**DEPARTMENT OF SANSKRIT VYAKARNA**
**PROGRAMME: MASTER OF ARTS**
**SEMESTER: II SEMSETER**

| SL NO | QUESTION |
|---|---|
| | **SHORT QUESTION** |
| 1 | प्रौढमनोरमाग्रन्थस्य प्रणेता कः ? |
| 2 | अर्थवदधातुरप्रत्ययः प्रातिपदिकमि''त्यत्र अधातुग्रहणस्य किं फलम्? |
| 3 | प्रातिपदिकसंज्ञाविधायकं सूत्रं किम् ? |
| 4 | प्रत्ययं प्रत्ययान्तञ्च च वर्जयित्वा इति अर्थः कथं लभ्यते ? |
| 5 | कृदन्तस्य प्रातिपदिकसंज्ञाविधायकं सूत्रं किम् ? |
| 6 | ''कृत्तद्धितसमासाश्च'' इत्यत्र समासग्रहणस्य किं फलम् ? |
| 7 | लिङ्गविशिष्टपरिभाषायाः सम्पूर्णं रूपं किम् ? |
| 8 | स्वौजस्मौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्….. इत्यादि सूत्रे जस् शस् इत्यत्र जकारशकारयोः अनुबन्धकरणस्य किं फलम्? |
| 9 | एकशः पदस्य कोर्थः ? |
| 10 | रामशब्दस्य अव्युत्पत्तिपक्षे केन सूत्रेण प्रातिपदिकसंज्ञा ? |
| 11 | तन्त्रं कतिविधम् ? |
| 12 | अक्षत्वरूपं कतिविधम् ? |
| 13 | तस्माच्छसो नः पुंसि इति सूत्रे तत्पदेन किं परामृश्यते ? |
| 14 | अट्कुप्वाङ्नुम्व्यवायेपि इति सूत्रे नुम् ग्रहणं कस्य उपलक्षणम् ? |
| 15 | पर्याणद्धमित्यत्र केन सूत्रेण णत्वं साध्यते ? |
| 16 | अतो भिस् ऐस् इति सूत्रे ऐसः स्थाने एस् इति कथन्नोच्यते ? |

| | |
|---|---|
| 17 | रामाभ्याम् इत्यत्र केन सूत्रेण दीर्घः ? |
| 18 | आदेशप्रत्यययोः इति सूत्रे सकारानुवर्तनं कुतः भवति ? |
| 19 | आदेशप्रत्यययोः इति पदे द्वन्द्वसाधुत्वं कथम् ? |
| 20 | रामौ इत्यत्र कथं पदसंज्ञा ? |
| 21 | सर्वशब्दो हि कस्य बोधकः ? |
| 22 | द्वन्द्वे च सूत्रं किं ज्ञाप्यते ? |
| 23 | जशः स्थाने शी आदेशः शित्वात् अनेकाल्त्वादिति ? |
| 24 | पञ्चत्रिंशद् अत्र कथं समासः क्रियते ? |
| 25 | समशब्दः कस्य पर्यायः सर्वस्य तुल्यस्य वा ? |
| 26 | स्वशब्दः कस्मिन् कस्मिन्नर्थे प्रयुज्यते ? |
| 27 | बाह्यशब्दस्य कोऽर्थः? |
| 28 | व्यवस्था का ? |
| 29 | अतिसर्वाय इत्यत्र कथं न सर्वनामसंज्ञा ? |
| 30 | पद्दन्नोमास.. इति सम्पूर्णं सूत्रं लिख्यताम् ? |
| 31 | अल्लोपोऽनः सूत्रार्थः कः लिख्यताम् ? |
| 32 | रषाभ्यां नो णः समानपदे इति सूत्रे समानग्रहणं किं बोधयति ? |
| 33 | पूर्वत्रासिद्धे न स्थानिवत् इति वचनस्य कोऽर्थः ? |
| 34 | नलोपः प्रातिपदिकस्य इत्यत्र नपदं लोपपदं कस्यां विभक्तौ रूपम् ? |

| | |
|---|---|
| 35 | विभाषा ङिश्योः इत्यत्र शी केन सूत्रेण विहितस्य गृह्यते ? |
| 36 | हाहा शब्दस्य का व्युत्पत्तिः ? |
| 37 | अच्च घेः इत्यत्र घेः इत्यत्र का विभक्तिः ? |
| 38 | हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सूत्रे कति पदानि सन्ति ? |
| 39 | प्रथमहल् ग्रहणं किमर्थम् ? |
| 40 | लुप्यते इति लोपः इति भावसाधनम्, कर्मसाधनमिति किमिति ? |
| 41 | प्रत्ययलोपे प्रत्ययलक्षणमिति कीदृशं सूत्रम् ? |
| 42 | युष्मदस्मद् षट्संज्ञकास्त्रिषु लिङ्गेषु कीदृक् रूपविशिष्टाः भवन्ति ? |
| 43 | अव्ययानां त्रिषु लिङ्गेषु कीदृशं रूपं भवति ? |
| 44 | वातप्रमीशब्दस्य कोऽर्थः ? |
| 45 | यूस्त्र्याख्यौ नदी इत्यत्र यू पदेन किं ज्ञायते ? |
| 46 | अचि श्नुधातुर्भ्रुवांय्वोरियङुवङौ इत्यत्र य्वोः कस्य विशेषणम् ? |
| 47 | हूहू इति कीदृशी संज्ञा वर्तते? |
| 48 | ख्यत्यात्परस्य इति सूत्रे ख्य इति विकृतनिर्देशः किं बोध्यते ? |
| 49 | क्रोष्टुशब्दस्य कथं सिद्धिः ? |
| 50 | ग्लौ शब्दस्य कोऽर्थः ? |
| | SHORT NOTE |
| 1 | "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रं स्वगिरा व्याख्यायताम् । |

| | |
|---|---|
| 2 | कृत्तद्धितसमासाश्च इति सूत्रं स्वगिरा व्याख्यायताम्। |
| 3 | प्रातिपिदकसंज्ञाविधायकयोः सूत्रद्वयोः प्रयोजनं प्रतिपाद्यताम्। |
| 4 | प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इयं परिभाषा व्याख्येया। |
| 5 | स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् सूत्रे अनुब्धन्धविचारः क्रियताम्। |
| 6 | सुपः सूत्रं व्याख्यायताम्। |
| 7 | सरूपाणामेकशेष एकविभक्तौ, इति सूत्रं मनोरमानुगुणं व्याख्यायताम्। |
| 8 | तस्माच्छसो नः पुंसि, सूत्रं प्रतिपाद्यताम्। |
| 9 | यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् सूत्रं सोदाहरणं लिख्यताम्। |
| 10 | नामि सूत्रं व्याख्यायताम्। |
| 11 | विरूपाणामपि समानार्थानामेकशेषः इति पक्षे घटकलशौ इत्यत्र एकशेषः सम्भवति न वा। |
| 12 | स्वादीनां एकवचनद्विवचनबहुवचनसंज्ञायां फलं विचार्यताम्। |
| 13 | सर्वादीनि सर्वनामानि, सूत्रं व्याख्यायताम्। |
| 14 | द्वन्द्वे च, सूत्रं विमृश्यताम्। |
| 15 | आमि सर्वनाम्नः सुट्, सूत्रं प्रतिपाद्यताम्। |
| 16 | उभशब्दो नित्यं द्विवचनान्तः इति वचनं विचार्यताम्। |
| 17 | अन्तरं बहिर्योगोपसंव्यानयोः, सूत्रं व्याख्यायताम्। |
| 18 | स्वमज्ञातिधनाख्यायाम्, सूत्रं प्रौढमनोरमामधिकृत्य लिख्यताम्। |
| 19 | रषाभ्यां णो नः समानपदे, सूत्रं प्रतिपाद्यताम्। |

| | |
|---|---|
| 20 | विभाषा ङिश्योः,सूत्रं प्रतिपाद्यताम् । |
| 21 | हाहान् इति प्रयोगं साधयतु । |
| 22 | अच्च घेःसूत्रं सप्रयोगं साध्यताम् । |
| 23 | अनङ् सौ सूत्रं प्रतिपाद्यताम् । |
| 24 | पतिः समास एव, सूत्रं प्रतिपाद्यताम् । |
| 25 | प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे प्रथमप्रत्ययग्रहणस्य किं फलमिति व्याख्यायताम् । |
| 26 | बहुश्रेयसी शब्दः विचार्यताम् । |
| 27 | अचिश्नुधातुभ्रुवां य्वोरियङुवङौ, इति सूत्रं व्याख्यायताम् । |
| 28 | तृज्वत्क्रोष्टुः, सूत्रं व्याख्यायताम् । |
| 29 | अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणामिति, सूत्रस्य नियमार्थत्वं प्रतिपाद्यताम् । |
| 30 | रात्सस्य, सूत्रं सोदाहरणं व्याख्यायताम् । |
| | LONG QUESTION |
| 1 | "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रे प्रत्ययपर्युदासः प्रत्ययान्तपर्युदासश्च किमर्थमिति मनोरमादिशा प्रतिपादयत। |
| 2 | "कृत्तद्धितसमासाश्च" इति सूत्रे समासग्रहणस्य विध्यर्थत्वं कुतो नेति सोपपत्तिकं समाधाय नियमार्थत्वं समर्थ्यताम्। |
| 3 | "ङ्याप्प्रातिपदिकात्" इति सूत्रे हल्ग्रहणस्य वैयर्थ्यमुपपाद्य परिह्रियताम् ङ्याप्स्सोरिति न्यासस्यौचित्यञ्च प्रदर्शयत। |
| 4 | विभक्तिश्च, सूत्रं सोदाहरणं व्याख्यायताम् । |
| 5 | प्रत्ययः, सूत्रं व्याख्यायताम् । |
| 6 | अमि पूर्वः, सूत्रं विव्रियताम् । |
| 7 | अट् कुप्वाङ्नुम्व्यवायेऽपि, सूत्रं व्याख्यायताम् । |

| | |
|---|---|
| 8 | अतो भिस् ऐस्, सूत्रं विमृश्यताम् । |
| 9 | आदेशप्रत्यययोः, इति सूत्रं मनोरमानुगुणं व्याख्यायताम् । |
| 10 | आदर्शेन प्रयोगे णत्वनिषेधप्रक्रियां प्रदर्श्य सिद्धान्तं लिखत । |
| 11 | सर्वनामसंज्ञायां फलं प्रतिपाद्यताम् । |
| 12 | जशः शी ,सूत्रेण शी-आदेशविचारः प्रस्तूयताम् । |
| 13 | सर्वादयः पञ्चत्रिंशच्चेतित विचार्यताम् । |
| 14 | पद्दन्नोमास्हन्निशसन्यूषन्दोषन्यकञ्छकन्नुदनासञ्छस्प्रभृतिषु, सूत्रं विचार्यताम् । |
| 15 | पूर्वपरावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायाम्, सूत्रं व्याख्यायताम् । |
| 16 | अल्लोपोऽनः, सूत्रं मनोरमानुगुणं व्याख्यायताम् । |
| 17 | नलोपः प्रातिपदिकान्तस्य, सूत्रं व्याख्यायताम् । |
| 18 | आङो नाऽस्त्रियाम्, सूत्रं व्याख्यायताम् । |
| 19 | हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल्, इति सूत्रं सपदकृत्यं व्याख्यायताम् । |
| 20 | सख्युरसम्बुद्धौ , इति सूत्रं व्याख्यायताम् । |
| 21 | प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रं व्याख्यायताम् । |
| 22 | यूख्व्याख्यौ नदी, इति सूत्रं विचार्यताम् । |
| 23 | एरनेकाचोऽसंयोगपूर्वस्य, सूत्रं प्रतिपाद्यताम् । |
| 24 | क्वौ लुप्तं न स्थानिवत्, वार्तिकं व्याख्यायताम् । |
| 25 | ख्यत्यात्परस्य, सूत्रं व्याख्यायताम् । |

**DEPARTMENT OF SANSKRIT VYAKARNA**
**PROGRAMME: MASTER OF ARTS**
**SEMESTER: II SEMSETER**

| NUMBER OF UNIT | COURSE CODE | SUBJECT TITLE | QUESTION MARK | SL NO | QUESTION |
|---|---|---|---|---|---|
| | | | | | SHORT QUESTION |
| 1st Unit | MAVYC202 | परिभाषेन्दुशेखरः-2 | 1 | 1 | परिभाषेन्दुशेखरस्य द्वितीयं प्रकरणं किम् ? |
| 1st Unit | | | 1 | 2 | बाधबीजप्रकरणे कति परिभाषाः सन्ति ? |
| 1st Unit | | | 1 | 3 | बाधबीजप्रकरणस्य प्रथमा परिभाषा का ? |
| 1st Unit | | | 1 | 4 | बाधबीजप्रकरणस्य अन्तिमा परिभाषा का ? |
| 1st Unit | | | 1 | 5 | सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इति परिभाषायाः कोऽर्थः ? |
| 1st Unit | | | 1 | 6 | सकृद्गतौ विप्रतिषेधे बाधितं तद्बाधितमेव इति परिभाषया किं कार्यं भवति? |
| 1st Unit | | | 1 | 7 | विकरणेभ्यो नियमो बलीयान् इति परिभाषायाः कथमवतरणसंगतिः ? |
| 1st Unit | | | 1 | 8 | परान्नित्यं बलवत् इति परिभाषायाः कोऽर्थः ? |
| 1st Unit | | | 1 | 9 | परान्नित्यस्य बलवत्त्वे किं बीजम्? |
| 1st Unit | | | 1 | 10 | शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः इति परिभाषा कुत्र स्पष्टा ? |
| 1st Unit | | | 1 | 11 | शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः इति परिभाषायाः उदाहरणं लिखत ? |
| 2nd Unit | | | 1 | 12 | लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः इति परिभाषा केन उक्ता ? |
| 2nd Unit | | | 1 | 13 | लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः इति परिभाषायाः उदाहरणं किम् ? |
| 2nd Unit | | | 1 | 14 | क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता इति परिभाषायाः कोऽर्थः? |
| 2nd Unit | | | 1 | 15 | स्वरभिन्नस्य प्राप्नुवन्विधिः नित्यो अनित्यो वा ? |

| | | | | | |
|---|---|---|---|---|---|
| 2nd Unit | | | 1 | 16 | स्वरभिन्नस्य प्रप्नुवन्विधिरनित्यो भवति इति परिभाषा कुत्र वर्तते? |
| 2nd Unit | | | 1 | 17 | नित्यापेक्षया को बलीयो भवति? |
| 2nd Unit | | | 1 | 18 | किन्नाम अन्तरङ्गम्? |
| 2nd Unit | | | 1 | 19 | अन्तरङ्गघटकस्य अङ्गशब्दस्य कोऽर्थः? |
| 3rd Unit | | | 1 | 20 | नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इत्यत्र बहिष् इति पदेन किं ज्ञायते? |
| 3rd Unit | | | 1 | 21 | नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इत्यत्र बहिष्ट्व इति पदस्य कः अर्थः? |
| 3rd Unit | | | 1 | 22 | नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषायाः ज्ञापकं किम्? |
| 3rd Unit | | | 1 | 23 | नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषायाः उदाहरणं किम्? |
| 3rd Unit | | | 1 | 24 | किं शास्त्रं अन्तरङ्गान् विधीन् बाधते? |
| 3rd Unit | | | 1 | 25 | अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इति परिभाषायाः ज्ञापकं किम्? |
| 3rd Unit | | | 1 | 26 | अन्तरङ्गान् विधीन् बहिरङ्गो लुग्बाधते इति परिभाषायाः उदाहरणं किम्? |
| 3rd Unit | | | 1 | 27 | वर्णादङ्गं बलीयो भवति इति परिभाषायाः कः अर्थः? |
| 3rd Unit | | | 1 | 28 | वार्णादाङ्गं बलीयो भवति इति परिभाषायां ज्ञापकं किम्? |
| 4th Unit | | | 1 | 29 | अकृतव्यूहाः इति पदस्य कोऽर्थः? |
| 4th Unit | | | 1 | 30 | अकृतव्यूहाः के भवन्ति? |
| 4th Unit | | | 1 | 31 | अकृतव्यूहाः पाणिनीयाः इति परिभाषायाः ज्ञापकं किम्? |
| 4th Unit | | | 1 | 32 | अन्तरङ्गादपि बलवान् कः? |
| 4th Unit | | | 1 | 33 | अपवादपदस्य कोऽर्थः? |

| | | | | | |
|---|---|---|---|---|---|
| 4th Unit | | | 1 | 34 | येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इत्यत्र प्राप्त पदे कः प्रत्ययः ? |
| 4th Unit | | | 1 | 35 | येन नाप्राप्ते इति परिभाषायाः कोऽर्थः ? |
| 4th Unit | | | 1 | 36 | क्वचिदपवादविषयेप्युत्सर्गोभिनिविशत इति इत्यत्र क्वचिद् पदेन किं ज्ञायते? |
| 4th Unit | | | 1 | 37 | क्वचिदपवादविषयेप्युत्सर्गोऽभिनिविशत इति इति परिभाषायाः उदाहरणं लिखत। |
| 4th Unit | | | 1 | 38 | क्वचिदपवादविषयेप्युत्सर्गोभिनिविशत  इत्यत्र अपवाद पदस्य कोऽर्थः? |
| 5th Unit | | | 1 | 39 | पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः इत्यत्र अभिनिविशन्ते इति पदस्य कोऽर्थः? |
| 5th Unit | | | 1 | 40 | बुद्ध्यारूढाः अपवादा उत्सर्गाः वा ? |
| 5th Unit | | | 1 | 41 | प्रकल्प्य चापवादविषयं तत उत्सर्गा अभिनिविशन्ते इति परिभाषायाः प्रकल्प्यशब्दस्य कोऽर्थः ? |
| 5th Unit | | | 1 | 42 | प्रकल्प्य चापवादविषयं तत उत्सर्गा अभिनिविशन्ते इति परिभाषायां ततः इति पदस्य कोऽर्थः ? |
| 5th Unit | | | 1 | 43 | उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते इति परिभाषां के पठन्ति? |
| 5th Unit | | | 1 | 44 | उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते इति परिभाषायाः कोऽर्थः ? |
| 5th Unit | | | 1 | 45 | कुत्रापवाद अन्तरङ्गेण बाध्यते? |
| 5th Unit | | | 1 | 46 | अभ्यासविकारेषु बाध्यबाधकभावो न भवतीति कया परिभाषया बोध्यते ? |
| 5th Unit | | | 1 | 47 | ताच्छीलिकेषु वाऽसरूपविधिर्नास्तीति परिभाषायाः कोऽर्थः ? |
| 5th Unit | | | 1 | 48 | क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्भवति न वा? |
| 5th Unit | | | 1 | 49 | लादेशेषु वाऽसरूपविधिर्भवति न वा ? |
| 5th Unit | | | 1 | 50 | लादेशेषु वाऽसरूपविधिर्भवतीत्यत्र किं ज्ञापकम् ? |
| | | | **QUESTION MARK** | **SL NO** | SHORT NOTE |

| | | | | | |
|---|---|---|---|---|---|
| 1st Unit | | | 6 | 1 | पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः, इति परिभाषा व्याख्यायताम् । |
| 1st Unit | | | 6 | 2 | सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव, इत्यस्याः ग्रन्थदिशा सार्थक्यं प्रतिपादयत । |
| 1st Unit | | | 6 | 3 | सर्वे पूर्वविप्रतिषेधाः संगृहीता इति भाष्यपङ्क्तेः कः आशयः प्रतिपाद्यताम् । |
| 1st Unit | | | 6 | 4 | 'विकरणेभ्यो नियमो बलीयान्' इति परिभाषायाः ज्ञापकस्य त्रयो पक्षाः के इति निरूप्यन्ताम् । |
| 1st Unit | | | 6 | 5 | परान्नित्यं बलवत् इति परिभाषा नागेशदिशा व्याख्यायताम् । |
| 1st Unit | | | 6 | 7 | शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति इति परिभाषां ग्रन्थदिशा व्याख्यायत। |
| 2nd Unit | | | 6 | 8 | लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः इत्यस्याः नागेशदिशा व्याख्या विधेया। |
| 2nd Unit | | | 6 | 9 | क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता इत्यस्याः व्याख्या कार्या। |
| 3rd Unit | | | 6 | 10 | नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति परिभाषाया अवतरणं प्रतिपाद्यताम् । |
| 3rd Unit | | | 6 | 11 | अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इति परिभाषायाः अवतरणं व्याख्यायताम् । |
| 3rd Unit | | | 6 | 12 | अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते इति परिभाषा ग्रन्थदिशा व्याख्यायताम् । |
| 3rd Unit | | | 6 | 13 | वार्णादाङ्गं बलीयो भवति इति परिभाषायाः अर्थं विलिख्य ज्ञापकं सयुक्तिकं लिखन्तु ? |
| 3rd Unit | | | 6 | 14 | वार्णादाङ्गं बलीयो भवति इति परिभाषायाः फलं नागेशदिशा प्रतिपाद्यताम् । |
| 4th Unit | | | 6 | 15 | अकृतव्यूहाः पाणिनीयाः इत्यस्याः ग्रन्थदिशा सार्थक्यं प्रतिपादयत। |
| 4th Unit | | | 6 | | अकृतव्यूहाः पाणिनीयाः इत्यस्याः  परिभाषायाः व्याख्याने समर्थग्रहणस्य अन्यत्र प्रयोजनं प्रतिपाद्य |
| 4th Unit | | | 6 | 16 | पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्, इति परिभाषा नागेशदिशा व्याख्येया। |
| 4th Unit | | | 6 | 17 | मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्, इति परिभाषा ग्रन्थदिशा व्याख्येया। |
| 4th Unit | | | 6 | 18 | अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा, इत्यस्याः ग्रन्थदिशा सार्थक्यं प्रतिपादयत। |

| | | | | | |
|---|---|---|---|---|---|
| 5th Unit | | | 6 | 19 | पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः इत्यस्याः अवतरणं विविच्यताम् । |
| 5th Unit | | | 6 | 20 | प्रकल्प्य चापवादविषयं तत उत्सर्गा अभिनिविशन्ते इति परिभाषायाः अर्थः फलञ्च वर्ण्यताम् । |
| 5th Unit | | | 6 | 21 | उपसञ्जनिष्यमाणनिमित्तोऽप्यवाद् उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' इति |
| 5th Unit | | | 6 | 22 | अभ्यासविकारेषु बाध्यबाधकभावो नास्ति, इत्यस्याः व्याख्या कार्या । |
| 5th Unit | | | 6 | 23 | लादेशेषु वासरूपविधिर्नास्ति इत्यस्याः व्याख्या कार्या । |
| 5th Unit | | | 6 | 24 | उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्, इति स्वाधीतग्रन्थदिशा व्याख्येया। |
| | | | **QUESTION MARK** | **SL NO** | LONG QUESTION |
| 1st Unit | | | 10 | 1 | पुनः प्रसङ्गविज्ञानात् सिद्धम्' 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति |
| 1st Unit | | | 10 | 2 | पुनः प्रसङ्ग' ' सकृद्गतिः..' इति न्याययोः कैयटोक्तबीजमुपपाद्य तद्दोषदानपूर्वकं च |
| 1st Unit | | | 10 | 3 | ''विकरणेभ्यो नियमो बलीयान्' इति परिभाषां सावतरणं व्याकुर्वन्तु । |
| 2nd Unit | | | 10 | 4 | असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायां प्रमाणं फलञ्चोपपाद्य |
| 2nd Unit | | | 10 | 5 | अर्थकृतबहिरङ्गतायाः खण्डनपूर्वकं 'पूर्वं धातुरुपसर्गेण युज्यते' इति पक्षमुक्त्वा<br>'अनुदात्तङित' इति सूत्रे कैयटोक्तां लकारविशेषापेक्षत्वाद् बहिरङ्गतां दूषयत । |
| 2nd Unit | | | 10 | 6 | संज्ञाकृतबहिरङ्गत्वानाश्रयणेन भाष्यकैयटयोर्विरोधमुपपाद्य नागेशदिशा समाधानं |
| 2nd Unit | | | 10 | 7 | 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषा त्रिपाद्यां न प्रवर्तते इति मतं नागेशदिशा |
| 2nd Unit | | | 10 | 8 | अन्तरङ्गं कीदृशं सोदाहरणं व्याख्यायताम् । |
| 3rd Unit | | | 10 | 9 | 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति परिभाषाया अवतरणम् अस्यां परिभाषायां प्रमाणं |
| 3rd Unit | | | 10 | 10 | अक्षद्यूरित्यत्र यणि कृते ऊठोऽसिद्धत्वाद् वलिलोपापत्तिं 'ह्रस्वस्य पिति'<br>सूत्रस्थभाष्यविरोधञ्च परिहृत्य नाजानन्तर्ये परिभाषायाः फलानि वर्णयत । |
| 3rd Unit | | | 10 | 11 | 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषाया अवतरणम्, अर्थम्, |

| | | | | | |
|---|---|---|---|---|---|
| 3rd Unit | | | 10 | 12 | वार्णपरिभाषा समानकार्यिताद्वयी कस्य हेतोरन्वधावि सा च केति निरूप्यताम् । |
| 3rd Unit | | | 10 | 13 | वार्णादाङ्गं बलीयः' इति परिभाषायाः ज्ञापकं विषयञ्च सम्यक् लिखत । |
| 3rd Unit | | | 10 | 14 | ‘‘वार्णपरिभाषाया यदयमभ्यासस्यासवर्णे' इत्यसवर्णग्रहणं करोति", इति भाष्योक्त्या असवर्णग्रहणस्य ज्ञापकता या लभ्यते तस्य उत्तरं नागेशेन कथं दत्तम् ? |
| 4th Unit | | | 10 | 15 | अकृतव्यूहपरिभाषया: फलं प्रमाणञ्च किम् ? तस्या: खण्डनप्रकारश्च नागेशेन [illegible] |
| 4th Unit | | | 10 | 16 | अपवादपदार्थं निरूप्य बाधबीजानि सोदाहरणानि परिभाषेन्दुरीत्या लेख्यानि । |
| 4th Unit | | | 10 | 17 | 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति परिभाषां सावतरणं व्याकुर्वन्तु । |
| 5th Unit | | | 10 | 18 | उपसञ्जनिष्यमाणनिमित्तोऽप्यवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' इति परिभाषाया अर्थनिरूपणपूर्वकम् अस्यां प्रमाणं फलञ्च निरूपयन्तु । |
| 5th Unit | | | 10 | 19 | अभ्यासविकारेषु बाध्यबाधकभावो नास्ति' इति परिभाषां सावतरणं व्याख्यायत। |

। सिद्धान्तं प्रतिपादयत।

DEPARTMENT OF SANSKRIT VYAKARNA
PROGRAMME: MASTER OF ARTS
SEMESTER: II SEMSETER

| NUMBER OF | COURSE CODE | SUBJECT | QUESTION MARK | SL NO | QUESTION |
|---|---|---|---|---|---|
| | | | | | SHORT QUESTION |
| 1st Unit | MAVYC203 | शब्देन्दुशेखर | 1 | 1 | लघुशब्देन्दुशेखरस्य रचयिता कः ? |
| 1st Unit | | | 1 | 2 | नागेशभट्टस्य गुरोर्नाम किमासीत् ? |
| 1st Unit | | | 1 | 3 | नागेशभट्टस्य पितुर्नाम किमासीत् ? |
| 1st Unit | | | 1 | 4 | नागेशभट्टस्य मातुर्नाम किमासीत् ? |
| 1st Unit | | | 1 | 6 | नागेशभट्टस्य आश्रयदाता नृपतिः क आसीत् ? |
| 1st Unit | | | 1 | 7 | श्रीरामसिंहः कस्य नगरस्य प्रशासक आसीत् ? |
| 1st Unit | | | 1 | 8 | नागेशभट्टस्य काचित् संततिरासीन्न वा ? |
| 1st Unit | | | 1 | 10 | लघुशब्देन्दुशेखरः कस्य ग्रन्थस्य व्याख्या वर्तते ? |
| 1st Unit | | | 1 | 11 | नागेशः कीदृशः विद्वान् वर्तते ? |
| 1st Unit | | | 1 | 12 | कं प्रणम्य लघुशब्देन्दुशेखरं करोति नागेशः ? |
| 1st Unit | | | 1 | 13 | लघुशब्देन्दुशेखरस्य विग्रहवाक्यं किम्? |
| 1st Unit | | | 1 | 14 | 'मनोरमोमार्द्धदेहम्' पदस्य को विग्रहः ? |
| 1st Unit | | | 1 | 15 | अरिकक्षहुताशनात् पदस्य कीदृशो विग्रहः ? |
| 1st Unit | | | 1 | 16 | परिभाव्येति पदं केन प्रकारेण व्याकृतवान् नागेशः ? |
| 1st Unit | | | 1 | 17 | अइउण् इत्यादीनां संज्ञासूत्रत्वं कथं भवति ? |

| | | | | | |
|---|---|---|---|---|---|
| 1st Unit | | | 1 | 18 | अइउण् इत्यादिषु संहिताकार्यं कथं न क्रियते ? |
| 1st Unit | | | 1 | 19 | अनुबन्धाः केन कृता: ? |
| 1st Unit | | | 1 | 20 | अइउण् इत्यादिसूत्राणां समाम्नायत्वं कथं भवति ? |
| 1st Unit | | | 1 | 21 | माहेश्वराणीति पदस्य कोऽर्थः ? |
| 1st Unit | | | 1 | 22 | अक्षरसमाम्नाये किमपि कस्मान्नास्त्यनर्थकम् ? |
| 1st Unit | | | 1 | 23 | भाष्यकारः वर्णानामुपदेशस्य किं प्रयोजनमाह ? |
| 1st Unit | | | 1 | 24 | ब्रह्मराशिरित्यस्य कोऽर्थः ? |
| 1st Unit | | | 1 | 25 | लण्सूत्रस्थस्याकारस्येत्संज्ञायाः किम्प्रयोजनम् ? |
| 1st Unit | | | 1 | 26 | किमर्थमनुबन्धाः क्रियन्ते ? |
| 1st Unit | | | 1 | 27 | आदिरन्त्येन सहेता, सूत्रे आदिरिति पदस्य किम् प्रयोजनम् ? |
| 1st Unit | | | 1 | 28 | आदिः कः? |
| 1st Unit | | | 1 | 29 | अन्त्यः कः? |
| 1st Unit | | | 1 | 30 | को नामोपदेशः ? |
| 1st Unit | | | 1 | 32 | 'उपदेशेऽजनुनासिक इत्' इति सूत्रे उपदेशपदेन उद्देशस्यापि ग्रहणं भवति न वा ? |
| 1st Unit | | | 1 | 33 | के व्यवसिता: ? |
| 1st Unit | | | 1 | 34 | किं नाम व्यवसितत्वम् ? |
| 1st Unit | | | 1 | 35 | तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रे आस्यग्रहणं किमर्थम् ? |
| 2nd Unit | | | 1 | 36 | अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रेण किं विधीयते ? |

| | | | | | |
|---|---|---|---|---|---|
| 2nd Unit | | | 1 | 37 | वृद्धिरादैच् इत्यत्र वृद्धिशब्दः किम्परकः? |
| 2nd Unit | | | 1 | 38 | वृद्धिरादैच इति सूत्रस्य वाक्यार्थः कः ? |
| 2nd Unit | | | 1 | 39 | वृद्धिरादैच् इति सूत्रे विधेयस्यापि वृद्धिपदस्य पूर्वपाठः किमर्थः ? |
| 2nd Unit | | | 1 | 40 | 'हलोऽनन्तराः संयोगः' इति सूत्रे आनन्तर्यं किं रूपम् ? |
| 3rd Unit | | | 1 | 41 | इको गुणवृद्धी सूत्रस्य परिभाषात्वं केन प्रकारेण भवति ? |
| 3rd Unit | | | 1 | 42 | का नाम परिभाषा ? |
| 3rd Unit | | | 1 | 43 | स्थानेऽन्तरतमः इत्यत्र तमप्ग्रहणं किमर्थम् ? |
| 3rd Unit | | | 1 | 44 | आन्तर्यं कतिविधम् ? |
| 3rd Unit | | | 1 | 45 | कानि चतुर्विधानि आन्तर्याणि सन्ति ? |
| 3rd Unit | | | 1 | 46 | उदः स्थास्तम्भोः पूर्वस्य इति सूत्रे उदपदे कीदृशी पञ्चमी ? |
| 3rd Unit | | | 1 | 47 | आदेः परस्येति सूत्रं कस्यापवादः ? |
| 3rd Unit | | | 1 | 48 | अनेकाल्शित्सर्वस्य इत्यत्र शित उदाहरणं किम् ? |
| 3rd Unit | | | 1 | 49 | स्वरितेनाधिकारः इत्यत्र स्वरितेन पदे कस्मिन्नर्थे तृतीया ? |
| 4th Unit | | | 1 | 50 | क्रय्य कस्मिन्नर्थे निपात्यते ? |
| 4th Unit | | | 1 | 51 | को नाम विकल्पः ? |
| 4th Unit | | | 1 | 52 | अनचि च इत्यत्र च किमर्थकः? |
| 4th Unit | | | 1 | 53 | क्रियावाचिनो भ्वादय इत्यत्र क्रियावाचिनः किम् ? |
| 4th Unit | | | 1 | 54 | क्रियावाचिनो भ्वादयः इत्यत्र भ्वादयः किम् ? |

| | | | | | |
|---|---|---|---|---|---|
| 4th Unit | | | 1 | 55 | निपातानां द्योतकत्वं वाचकत्वं च कुत्र भवति ? |
| 4th Unit | | | 1 | 56 | गतिश्चेति सूत्रे च किमर्थः ? |
| 5th Unit | | | 1 | 57 | अचोऽन्त्यादि टि इत्यत्र अच कस्मिन्नर्थे षष्ठी? |
| 5th Unit | | | 1 | 58 | न पदान्त इत्यस्मिन्सूत्रे द्विवचनसवर्णादिग्रहणं किमर्थम् ? |
| 5th Unit | | | 1 | 59 | लोपः शाकल्यस्य इत्यत्र अशि इत्यस्यानुवृत्तिः कुतः आयाति? |
| | | | QUESTION MARK | SL NO | SHORT NOTE |
| 1st Unit | | | 6 | 1 | 'अइउण्' इत्यादि प्रत्याहारसूत्रेषु सन्ध्यभावं नागेशदिशोपपादयत। |
| 1st Unit | | | 6 | 2 | 'आदिरन्त्येन सहेता' इति सूत्रं नागेशदिशा संक्षेपेण व्याख्यायताम्। |
| 1st Unit | | | 6 | 3 | प्रतिज्ञाऽनुनासिक्याः पाणिनीयाः इति वाक्यस्याभिप्रायः कः ? |
| | | | 6 | 4 | 'ऊकालोऽज्झस्वदीर्घप्लुतः' इति सूत्रे कालग्रहणस्य अच्ग्रहणस्य च प्रयोजनं निरूपयत। |
| 1st Unit | | | 6 | 5 | आस्य ग्रहणस्य फलं प्रतिपाद्य वर्णानामुच्चारणस्थानं वर्ण्यताम्। |
| 1st Unit | | | 6 | 6 | पूर्वत्रासिद्धमित्यस्याधिकारत्वे फलं सम्यक् प्रदर्श्य कार्यासिद्धत्वपक्षे दोषमुद्भाव्य तत्रत्यो विशेष उपपादनीयः। |
| 2nd Unit | | | 6 | 7 | शेखरकारदिशा 'अणुदित्सवर्णस्ये 'ति सूत्रं व्याकुर्वन्तु। |
| 2nd Unit | | | 6 | 8 | 'तपरस्तत्कालस्ये'ति सूत्रस्य तपरशब्दे बहुव्रीहितत्पुरुषयोराश्रयणफलं सप्रमाणं निरूप्य सूत्रस्यास्य विध्यर्थत्वं नियमार्थत्वं वाभिमतमिति विवेचयत। |
| 2nd Unit | | | 6 | 9 | 'स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रस्य प्रयोजनं प्रदर्शनीयम्। |
| 2nd Unit | | | 6 | 10 | येन विधिस्तदन्तस्ये 'ति सूत्रे 'येने 'ति तृतीयायाः स्वरूपं सप्रमाणं प्रतिपादयत। |
| 2nd Unit | | | 6 | 11 | 'सुप्तिङन्तं पदम्' इति सूत्रघटकीभूतस्यान्तग्रहणस्य प्रयोजनं विशदं विवेचयन्तु। |

| | | | | | |
|---|---|---|---|---|---|
| 2nd Unit | | | 6 | 12 | हलोऽनन्तराः संयोगः' इत्यनेन सूत्रेण एकस्य द्वयोर्बहूनां वा हलां संयोगसंज्ञेति विविच्य लिखन्तु । |
| 3rd Unit | | | 6 | 13 | इको गुणवृद्धी इति सूत्रस्य परिभाषात्वं प्रतिपाद्यताम्। |
| 3rd Unit | | | 6 | 14 | आद्यन्तौ टकितौ इति सूत्रं व्याख्यायत। |
| 3rd Unit | | | 6 | 15 | अनेकाल्शित्सर्वस्य इति सूत्रं नागेशदिशा व्याख्यायत। |
| 3rd Unit | | | 6 | 16 | स्थानेऽन्तरतमः इति सूत्रस्य वाक्यभेदं प्रदर्श्य नागेशमतं प्रस्तूयताम्। |
| 3rd Unit | | | 6 | 17 | अचः परस्मिन् पूर्वविधौ' इति सूत्रघटके पूर्वविधाविति पदे तन्त्रस्वीकारे फलप्रमाणञ्च प्रदर्शयत । |
| 4th Unit | | | 6 | 18 | 'अदर्शनं लोपः' इति सूत्रस्य व्याख्याने समागतस्य प्रसक्तस्य इति पदस्य ग्रहणं किमर्थम्। |
| 4th Unit | | | 6 | 19 | अचो रहाभ्यां द्वे इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 4th Unit | | | 6 | 20 | इचोऽचि यणयवायावः इत्यस्य आशयं प्रतिपाद्यताम्। |
| 4th Unit | | | 6 | 21 | लोपः शकल्यस्येति सूत्रस्य वृत्तौ अशिग्रहणं किमर्थम् ? |
| 4th Unit | | | 6 | 22 | एकः पूर्वपरयोः इति सूत्रे एकः ग्रहणं किमर्थम्। |
| 4th Unit | | | 6 | 23 | अचोन्त्यादि टि इति सूत्रे प्रतिपदं विभज्य तेषाम् अर्थं प्रतिपाद्यताम्। |
| 5th Unit | | | 6 | 24 | एङः पदान्तादति इति सूत्रे पदान्तादिति किमर्थम् । |
| 5th Unit | | | 6 | 25 | अवङ् स्फोटायनस्य इति सूत्रस्य स्फोटायनः इति पदस्य व्युत्पत्तिः प्रदर्शनीया। |
| 5th Unit | | | 6 | 26 | अथ प्रकृतिभावः इति प्रसङ्गसङ्गतिः प्रदर्श्यताम् । |
| 5th Unit | | | 6 | 27 | ऋत्यकः इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 5th Unit | | | 6 | 28 | वाक्यस्य टेः प्लुत उदात्तः, इति सूत्रस्य प्रसङ्गसङ्गतिः प्रदर्श्यताम्। |
| 5th Unit | | | 6 | 29 | वाक्यस्य टेः प्लुत उदात्तः इति सूत्रे वाक्यग्रहणस्य प्रयोजनं प्रदर्श्य टि ग्रहणस्य प्रयोजनं प्रदर्शयताम्। |

| | | | | | |
|---|---|---|---|---|---|
| 5th Unit | | | 6 | 30 | 'निपात एकाजि'ति सूत्रं सपदकृत्यं व्याकुर्वन्तु । |
| | | | **QUESTION MARK** | **SL NO** | LONG QUESTION |
| 1st Unit | | | 10 | 1 | अइउण्' इत्यादीनां संज्ञासूत्रत्वं प्रतिपाद्य 'स्वौजस्' इत्यादीनां सुबादिसंज्ञासूत्रत्वं स्वादिविधायकत्वञ्च निरूपयत। |
| 1st Unit | | | 10 | 2 | 'वर्णात्कारः' इति वार्तिकस्य अर्थम्परिष्कृत्य अइउण् इत्यादि सूत्राणां वर्णेभ्यः कारप्रत्ययः कथं न भवतीति सम्यगालोचयन्तु। |
| 1st Unit | | | 10 | 3 | नृत्तावसाने नटराज...... इत्यादि कारिकां सम्पूर्णं विलिख्य प्रतिपादयत । |
| 1st Unit | | | 10 | 4 | प्रत्याहारेनुबन्धानां कथमज्ग्रहणेषु न, इति भाष्यपङ्क्तिः नागेशदिशा व्याख्यायताम्। |
| 1st Unit | | | 10 | 5 | उपदेशे इदन्त्यम्' 'अच' 'अनुनासिक' इति न्यासेन  अन्योन्याश्रयपरिहारप्रकारम्प्रदर्श्य नागेशदिशा खण्डयन्तु । |
| 1st Unit | | | 10 | 6 | पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः इत्यस्य आशयं वर्ण्यताम्। |
| 1st Unit | | | 10 | 7 | आदिरन्त्येन सहेता' इति सूत्रस्यान्त्यादिशब्दयोः परस्परसापेक्षत्वाद् अन्यतरस्योपादानेनैवान्यतरस्याक्षेपसम्भवे उभयोरुपादानस्य प्रयोजनं |
| 1st Unit | | | 10 | 8 | आचार्यो नागेशः 'हलन्त्यम्' इति सूत्रं समस्तासमस्तं वा मनुते, इति विचार्य शेखरदिशा 'हलन्त्यम्' सूत्रं व्याकुर्वन्तु । |
| 1st Unit | | | 10 | 9 | उपदेश' इति सूत्रे प्राचीनानां मतानुसारेणोपदेशपदार्थं विविच्य नव्यानां मते प्रसक्तं भाष्यविरोधं समाधायोपदेशपदार्थ शेखरकारोक्तदिशा |
| 1st Unit | | | 10 | 10 | मुखनासिकावचनोऽनुनासिकः इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 1st Unit | | | 10 | 11 | तुल्यास्यप्रयत्नं सवर्णमिति सूत्रस्य 'तुल्यौ आस्यप्रयत्नौ यस्य' इति शेखरोक्तविग्रहानुसारेण तुल्यशब्दस्य पुंस्त्वं तथा अस्य विग्रहस्य सार्थक्यं |
| 2nd Unit | | | 10 | 12 | 'तपरस्तत्कालस्ये'ति सूत्रस्य तपरशब्दे बहुव्रीहितत्पुरुषयोराश्रयणफलं सप्रमाणं निरूप्य सूत्रस्यास्य विध्यर्थत्वं नियमार्थत्वं वाभिमतमिति विवेचयत । |
| 2nd Unit | | | 10 | 13 | 'स्वं रूपं शब्दस्याशब्दसंज्ञा  इति सूत्रं शेखरदिशा प्रदर्शनीया । |
| 2nd Unit | | | 10 | 14 | येन विधिस्तदन्तस्ये 'ति  सूत्रं  प्रतिपादयत । |
| 2nd Unit | | | 10 | 15 | 'सुप्तिङन्तं पदम्' इति सूत्रं  विशदं विवेचयन्तु । |
| 2nd Unit | | | 10 | 16 | हलोऽनन्तराः संयोगः' सूत्रं शेखरदिशा लिखन्तु । |

| | | | | | |
|---|---|---|---|---|---|
| 3rd Unit | | | 10 | 17 | 'इको गुणवृद्धी' इति सूत्रस्य परिभाषात्वमुपपाद्य, अस्य सूत्रस्य विषये लक्षणप्रतिपदोक्तपरिभाषया कथं नेष्टसिद्धिरिति विचार्य अत्रत्यं निर्दुष्टं प्रतिपदोक्तत्वं परिष्कृत्य, तपरसूत्राभिमतं नियमार्थत्वमुपस्थापयन्तु । |
| 3rd Unit | | | 10 | 18 | स्थानेऽन्तरतमः इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 3rd Unit | | | 10 | 19 | तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रघटकीभूतयोः सप्तम्याः इति पदस्य च प्रयोजनं विविच्य वाक्यार्थे उपश्लिष्टस्येत्यर्थं उपपत्तिं दर्शयत । |
| 3rd Unit | | | 10 | 20 | अलोऽन्त्यस्य इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 3rd Unit | | | 10 | 21 | इको यणचि इति सूत्रे जातिव्यक्तिपक्षं नागेशदिशा वर्ण्यताम्। |
| 3rd Unit | | | 10 | 22 | अनचि च इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 3rd Unit | | | 10 | 23 | स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्य प्रयोजनमुपपाद्य 'वद'ग्रहणफलम् आदेशग्रहणफलञ्च विविच्य विधिग्रहणस्य सफलतां प्रदर्श्य, उभयमतेनात्विधावित्यस्यार्थं प्रकाश्य शास्त्रकार्यातिदेशयोः सप्रमाणं सिद्धान्तं लिखन्तु । |
| 3rd Unit | | | 10 | 24 | 'अन्तादिवच्चे'ति सूत्रस्यार्थमुपवर्ण्य स्थानिवत्सूत्रेण तस्य गतार्थता भवति न वेति विचार्य अत्रत्यं ताद्रूप्यं परिष्कुरुत । |
| 4th Unit | | | 10 | 25 | अदर्शनं लोपः इति सूत्रं ग्रन्थदिशा व्याख्यायताम्। |
| 4th Unit | | | 10 | 26 | एचोयवायावः इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 4th Unit | | | 10 | 27 | उरण् रपरः इति सूत्रस्य अर्थं प्रतिपाद्य ‘र’'प्रत्याहारः कथं खण्डितो नागेशेनेति सयुक्तिकं सिद्धान्तं व्यवस्थापयन्तु। |
| 5th Unit | | | 10 | 28 | इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रं नागेशदिशा व्याख्यायताम्। |
| 5th Unit | | | 10 | 29 | प्रत्यभिवादेशूद्रे इति प्रत्यभिवादार्थं प्रतिपाद्य अशूद्रे इति ग्रहणस्य प्रयोजनम् उपस्थाप्य नागेशदिशा व्याख्यायताम्। |
| 5th Unit | | | 10 | 30 | ‘निपात एकाजनाङ्' इति सूत्रे 'अनाङ्' इत्यत्र नञः पर्युदासप्रसज्यप्रतिषेधयोः कतमो हि पक्षः समीचीनः? इति सुष्ठु विविच्य एकग्रहणस्य प्रयोजनं विशदं निरूपयत । |

**DEPARTMENT OF SANSKRIT VYAKARNA**

**PROGRAMME: MAVYD**

**SEMESTER: II SEMSETER**

| NUMBER OF UNIT | OURSE COI | UBJECT TITL | QUESTION MARK | SL NO | QUESTION | |
|---|---|---|---|---|---|---|
| | | | | | **SHORT QUESTION** | |
| 1 TO 4 | **MAVYD204** | **ाकरणसिद्धान्तकौ** | 1 | 1 | वैयाकरणसिद्धान्तकौमुद्या: कर्ता क:? | |
| Unit-1 | | | 1 | 2 | समर्थः पदविधिः कीदृशं सूत्रम्? | |
| Unit-1 | | | 1 | 3 | समासस्य कति भेदाः सन्ति? | |
| Unit-1 | | | 1 | 4 | का नाम वृत्तिः? | |
| Unit-1 | | | 1 | 5 | उपसर्जनसंज्ञाविधायकं सूत्रं किम्? | |
| Unit-1 | | | 1 | 6 | अतिहिमम् इत्यत्र कस्मिन्नर्थे अव्ययीभावः समासः कश्चविग्रहः? | |
| Unit-1 | | | 1 | 7 | परोक्षम् इत्यत्र कः समासः? | |
| Unit-1 | | | 1 | 8 | 'यथाशक्तिः' इत्यत्र कस्मिन्नर्थे अव्ययीभावसमासः? | |
| Unit-1 | | | 1 | 9 | ससखि इत्यत्र कस्मिन्नर्थे अव्ययीभावसमासः? | |
| Unit-1 | | | 1 | 10 | 'उपग्रामम्' इति कस्य समासस्य उदाहरणम्? | |
| Unit-1 | | | 1 | 11 | संख्या वंश्येन इत्यस्य कोऽर्थः? | |
| Unit-2 | | | 1 | 12 | तत्पुरुषः इति कीदृशं सूत्रम्? | |
| Unit-2 | | | 1 | 13 | पञ्चमीभयेन अर्थं स्पष्टं लिखत। | |
| Unit-2 | | | 1 | 14 | तत्पुरुषे किं प्रधानम्? | |
| Unit-2 | | | 1 | 15 | तत्पुरुषः कति प्रकारकाः भवन्ति? | |
| Unit-2 | | | 1 | 16 | न निर्धारणे इति सूत्रस्य कोऽर्थः? | |
| Unit-2 | | | 1 | 17 | 'राजपुत्रः' इति कस्य समासस्य उदाहरणम् ? | |
| Unit-2 | | | 1 | 18 | उन्मत्तगङ्गम् इत्यत्र कः समासः? | |
| Unit-2 | | | 1 | 19 | द्विगुसमासस्य कुत्रान्तर्भावो भवति? | |
| Unit-2 | | | 1 | 20 | 'पञ्चपादः' इति कः समासः? | |

| | | | | | | |
|---|---|---|---|---|---|---|
| Unit-2 | | | 1 | 21 | गति तत्पुरुषे किं भवति? | |
| Unit-2 | | | 1 | 22 | को नामोपपदसमासः? | |
| Unit-2 | | | 1 | 23 | दुःखातीतः इत्यस्य लौकिकविग्रहं लिखत। | |
| Unit-2 | | | 1 | 24 | पुरुषव्याघ्रः इति पदस्य लौकिकविग्रहं लिखत। | |
| Unit-2 | | | 1 | 25 | अतिमालः इति पदस्य लौकिकविग्रहं लिखत। | |
| Unit-3 | | | 1 | 26 | 'पीताम्बरः' इति कः समासः? | |
| Unit-3 | | | 1 | 27 | बहुव्रीहेः किं लक्षणम्? | |
| Unit-3 | | | 1 | 28 | बहुव्रीहिसमासस्य कत्यवान्तरभेदाः भवन्ति? | |
| Unit-3 | | | 1 | 29 | बहुव्रीहिसमासविधायकं सूत्रं किम्? | |
| Unit-3 | | | 1 | 30 | कुत्र भवति व्यधिकरणबहुव्रीहिः? | |
| Unit-3 | | | 1 | 31 | युवजानि इति पदस्य लौकिकविग्रहः कः ? | |
| Unit-4 | | | 1 | 32 | द्वन्द्वसमासस्य किं लक्षणम्? | |
| Unit-4 | | | 1 | 33 | द्वन्द्वसमासे कः प्रधानः? | |
| Unit-4 | | | 1 | 34 | को नाम समुच्चयः? | |
| Unit-4 | | | 1 | 35 | इतरेतरद्वन्द्वः कः? | |
| Unit-4 | | | 1 | 36 | समाहारद्वन्द्वः कः? | |
| Unit-4 | | | 1 | 37 | 'रामलक्ष्मणौ' इति कः समासः? | |
| Unit-4 | | | 1 | 38 | समुच्चयाद्यर्थे द्वन्द्वविधायकं सूत्रं किम्? | |
| Unit-4 | | | 1 | 39 | पितरौ पदस्य कः लौकिकविग्रहः? | |
| Unit-4 | | | 1 | 40 | गुरुशिष्यौ इति कस्य समासस्य उदाहरणम्? | |
| Unit-4 | | | 1 | 41 | हंसौ इति पदस्य लौकिकविग्रहः कः ? | |
| Unit-4 | | | 1 | 42 | अग्नीषोमौ इति पदस्य लौकिकविग्रहः कः ? | |
| Unit-5 | | | 1 | 43 | एकशेषः कः? | |
| Unit-5 | | | 1 | 44 | द्वीपम् इति शब्दस्य का व्युत्पत्तिः? | |
| Unit-5 | | | 1 | 45 | समासान्तप्रत्ययः कः? | |
| Unit-5 | | | 1 | 46 | अलुक्समासः कः? | |

| | | | | | | |
|---|---|---|---|---|---|---|
| Unit-5 | | | 1 | 47 | ‘अलुक्’ इत्यस्य अर्थः कः? | |
| Unit-5 | | | 1 | 48 | समासाश्रयः कः? | |
| Unit-5 | | | 1 | 49 | समासाश्रयविधिः कः? | |
| Unit-5 | | | 1 | 50 | विभाषा पुरुषे इति सूत्रस्य कोऽर्थः? | |
| | | | | | **SHORT NOTE** | |
| Unit-1 | | | 6 | 1 | अव्ययीभावसमासस्य लक्षणं, प्रमुखभेदाः लिखत। | |
| Unit-1 | | | 6 | 2 | भूतपूर्वः ,अधिहरिः इति रूपद्वयं साध्यताम्। | |
| Unit-1 | | | 6 | 3 | अव्ययीभावसमासे पूर्वपदप्रधानता कथं भवति? | |
| Unit-1 | | | 6 | 4 | परोक्षम्, पारेगङ्गम्  इति रूपद्वयं साध्यताम्। | |
| Unit-1 | | | 6 | 5 | उपशरदम्, त्रिमुनि इति रूपद्वयं साध्यताम्। | |
| Unit-2 | | | 6 | 6 | तत्पुरुषसमासस्य लक्षणं, प्रमुखभेदाः लिखत। | |
| Unit-2 | | | 6 | 7 | द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति सूत्रं व्याख्यायताम्। | |
| Unit-2 | | | 6 | 8 | कर्मधारयसमासः किम्? उदाहरणं दत्त। | |
| Unit-2 | | | 6 | 9 | शङ्कुलाखण्डः, राजपुरुषः इति रूपद्वयं साध्यताम्। | |
| Unit-2 | | | 6 | 10 | चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः इति सूत्रं प्रतिपाद्यताम्। | |
| Unit-2 | | | 6 | 11 | अर्धपिप्पलो, नखनिर्भिन्नः इति रूपद्वयं साध्यताम्। | |
| Unit-3 | | | 6 | 12 | पञ्चगवधनः, कण्ठेकालः इति रूपद्वयं साध्यताम्। | |
| Unit-3 | | | 6 | 13 | शेषो बहुव्रीहिः इति सूत्रं व्याख्यायताम्। | |
| Unit-3 | | | 6 | 14 | अपुत्रः पुरुषः, उष्ट्रमुखः इति रूपद्वयं साध्यताम्। | |
| Unit-3 | | | 6 | 15 | इनः स्त्रियाम् इति सूत्रं व्याख्यायताम्। | |
| Unit-3 | | | 6 | 16 | सप्तमीविशेषणे इति सूत्रं व्याख्यायताम्। | |

| | | | | | | |
|---|---|---|---|---|---|---|
| Unit-4 | | | 6 | 17 | चार्थे द्वन्द्वः इति सूत्रं व्याख्यायताम्। | |
| Unit-4 | | | 6 | 18 | द्वन्द्वसमासस्य भेदाः व्याख्यायताम्। | |
| Unit-4 | | | 6 | 19 | विप्रतिषिद्धं च इति सूत्रं व्याख्यायताम्। | |
| Unit-4 | | | 6 | 20 | विभाषा समीपे इति सूत्रं व्याख्यायताम्। | |
| Unit-4 | | | 6 | 21 | देवताद्वन्द्वे च इति सूत्रं व्याख्यायताम्। | |
| Unit-4 | | | 6 | 22 | दिवसश्च पृथिव्याम् इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 23 | ग्राम्यपशुसंङ्घेष्वतरुणेषु स्त्री इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 24 | ऊदनोर्देशे इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 25 | ऋक्पूरब्धूः पथामानक्षेः इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 26 | घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 27 | अच्प्रत्यन्ववपूर्वात्सामलोम्नः इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 28 | न पूजनात् इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 29 | सम्प्रसारणस्य दीर्घ इति सूत्रं व्याख्यायताम्। | |
| Unit-5 | | | 6 | 30 | नपुंसकम् इति सूत्रं व्याख्यायताम्। | |
| | | | | | **LONG QUESTION** | |
| Unit-1 | | | 10 | 1 | अव्ययीभावसमासस्य लक्षणं, स्वरूपं, भेदाश्च उदाहरणैः सह विवृणुत। | |
| Unit-1 | | | 10 | 2 | अधिहरिः,सुमद्रमिति प्रयोगद्वयं साध्यताम्। | |
| Unit-1 | | | 10 | 3 | नदीभिश्च, अन्यपदार्थे च संज्ञायाम् इति सूत्रद्वयं व्याख्यायताम्। | |
| Unit-1 | | | 10 | 4 | पञ्चमीभयेन, सप्तमी शौण्डैः सूत्रद्वयं प्रस्तूयताम् । | |
| Unit-2 | | | 10 | 5 | तद्धितार्थोत्तरपदसमाहारे च इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-2 | | | 10 | 6 | विशेषणं विशेष्येण बहुलम् इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-2 | | | 10 | 7 | परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-2 | | | 10 | 8 | मयूरव्यंसकादयश्च इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-2 | | | 10 | 9 | जीविकोपनिषदावौपम्ये इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-3 | | | 10 | 10 | वृद्धिनिमित्तस्य च इति सूत्रं सोदाहरणं व्याख्यायताम्। | |

| | | | | | | |
|---|---|---|---|---|---|---|
| Unit-3 | | | 10 | 11 | शेषाद्विभाषा इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-3 | | | 10 | 12 | तत्र तेनेदमिति सरूपे इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-3 | | | 10 | 13 | उपसर्गाद् बहुलम् इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-3 | | | 10 | 14 | नित्यमसिच्प्रजामेधयोः इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-4 | | | 10 | 15 | विशिष्टलिङ्गो नदीदेशोऽग्रामाः इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-4 | | | 10 | 16 | प्राप्तोदको ग्रामः, प्रपर्णः इति प्रयोगद्वयं साध्यताम्। | |
| Unit-4 | | | 10 | 17 | शिवकेशवौ, कुशकाशम् इति प्रयोगद्वयं साध्यताम्। | |
| Unit-4 | | | 10 | 18 | विभाषा वृक्ष इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 19 | स्त्री पुंवच्च इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 20 | नपुंसकम् इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 21 | न पूजनात् इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 22 | पञ्चम्याः स्तोकादिभ्यः इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 23 | सम्प्रसारणस्य दीर्घ इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 24 | कारे सत्यागदस्य इति सूत्रं सोदाहरणं व्याख्यायताम्। | |
| Unit-5 | | | 10 | 25 | तीर्थे ये इति सूत्रं सोदाहरणं व्याख्यायताम्। | |

| DEPARTMENT OF SANSKRIT VYAKARNA | | | | | |
|---|---|---|---|---|---|
| PROGRAMME: MASTER OF ARTS | | | | | |
| SEMESTER:  II SEMSETER | | | | | |
| NUMBER OF UNIT | COURSE CODE | SUBJECT TITLE | QUE STIO | SL NO | QUESTION |
| | | | | | SHORT QUESTION |
| 1st Unit | **MAVYV205** | **भाषाविज्ञानम्** | 1 | 1 | भाषाविज्ञानपदे विज्ञानपदं कमर्थं द्योतयति  ? |
| 1st Unit | | | 1 | 2 | किं नाम भाषाविज्ञानम्? |
| 1st Unit | | | 1 | 3 | भाषाशब्दः कस्मिन् लिङ्गे व्यवहृतो भवति ? |
| 1st Unit | | | 1 | 4 | का नाम भाषा ? |
| 1st Unit | | | 1 | 5 | भाषा कथं सामाजिकी भवति? |
| 1st Unit | | | 1 | 6 | ध्वनिः कः? |
| 1st Unit | | | 1 | 7 | ध्वनिविज्ञानं किम्? |
| 1st Unit | | | 1 | 8 | उच्चारणस्थानानि कानि? |
| 1st Unit | | | 1 | 9 | उच्चारणप्रकाराः के? |
| 1st Unit | | | 1 | 10 | लोके सर्वं केन भाषते ? |
| 1st Unit | | | 1 | 11 | व्यञ्जनस्य लक्षणं किम्? |
| 1st Unit | | | 1 | 12 | अनुनासिकवर्णान्  लिखत। |
| 2nd Unit | | | 1 | 13 | महाप्राण-अल्पप्राणयोः भेदः कः? |
| 2nd Unit | | | 1 | 14 | रूपविज्ञानं किम्? |
| 2nd Unit | | | 1 | 15 | मूलरूपं किम्? |

| | | | | | |
|---|---|---|---|---|---|
| 2nd Unit | | | 1 | 16 | धातुः कः? |
| 2nd Unit | | | 1 | 17 | प्रत्ययः कः? |
| 2nd Unit | | | 1 | 18 | उपसर्गः कः? |
| 2nd Unit | | | 1 | 19 | समासः कः? |
| 2nd Unit | | | 1 | 20 | तद्धितप्रत्ययाः किमर्थं? |
| 2nd Unit | | | 1 | 21 | वाक्यं किम्? |
| 2nd Unit | | | 1 | 22 | वाक्यविज्ञानं किम्? |
| 2nd Unit | | | 1 | 23 | कर्तृ-कर्म-क्रिया सम्बन्धः कः? |
| 2nd Unit | | | 1 | 24 | व्यवह्रियमाणा वाक् का ? |
| 3rd Unit | | | 1 | 25 | वाच्यभेदाः के? |
| 3rd Unit | | | 1 | 26 | अर्थविज्ञानं किम्? |
| 3rd Unit | | | 1 | 27 | शब्दार्थः कः? |
| 3rd Unit | | | 1 | 28 | ग्रासम्यान्ध्वनिनियमः किम्? |
| 3rd Unit | | | 1 | 29 | ध्वनिना कस्य शब्दस्य ग्रहणं भवति ? |
| 3rd Unit | | | 1 | 30 | कति वर्गाः सन्ति? |
| 3rd Unit | | | 1 | 31 | कति स्पर्शवर्णाः सन्ति? |
| 3rd Unit | | | 1 | 32 | सन्दर्भस्य महत्त्वं किम्? |
| 3rd Unit | | | 1 | 33 | वक्ता-श्रोता सम्बन्धः कः? |

| | | | | | |
|---|---|---|---|---|---|
| 3rd Unit | | | 1 | 34 | भाषापरिवारः कः? |
| 3rd Unit | | | 1 | 35 | इण्डो-यूरोपीयपरिवारः कः? |
| 3rd Unit | | | 1 | 36 | संस्कृतभाषा कस्मिन् परिवारः? |
| 3rd Unit | | | 1 | 37 | प्राकृतभाषा का? |
| 3rd Unit | | | 1 | 38 | अपभ्रंशः कः? |
| 3rd Unit | | | 1 | 39 | भाषापरिवर्तनं किम्? |
| 3rd Unit | | | 1 | 40 | ध्वनिपरिवर्तनं किम्? |
| 4th Unit | | | 1 | 41 | अर्थपरिवर्तनं किम्? |
| 4th Unit | | | 1 | 42 | रूपपरिवर्तनं किम्? |
| 4th Unit | | | 1 | 43 | समाजभाषाविज्ञानं किम्? |
| 4th Unit | | | 1 | 44 | उपभाषा का? |
| 4th Unit | | | 1 | 45 | मानकभाषा का? |
| 4th Unit | | | 1 | 46 | भाषाभेदाः के? |
| 4th Unit | | | 1 | 47 | मनोभाषाविज्ञानं किम्? |
| 4th Unit | | | 1 | 48 | **भाषायाः वैशिष्ट्यानि ?** |
| 4th Unit | | | 1 | 49 | **भाषासामान्यता किम्?** |
| 4th Unit | | | 1 | 50 | **ध्वनिनियमः इत्युक्ते किम्?** |
| | | | | | SHORT NOTE |

| | | | | | |
|---|---|---|---|---|---|
| 1st Unit | | | 6 | 1 | भाषाविज्ञानं किमिति विचार्यताम् । |
| 1st Unit | | | 6 | 2 | भाषाविज्ञानस्य स्वरूपं क्षेत्रं च विवेचयत। |
| 1st Unit | | | 6 | 3 | ध्वनिविज्ञानस्य (Phonetics) स्वरूपं स्पष्टयत। |
| 1st Unit | | | 6 | 4 | भाषाविज्ञानस्य वैलक्षण्यं प्रतिपाद्यताम् । |
| 1st Unit | | | 6 | 5 | वाग्विभागविचारः क्रियताम् । |
| 1st Unit | | | 6 | 6 | भाषापरिवर्तनस्य प्रमुखानि कारणानि कानि सन्ति? |
| 1st Unit | | | 6 | 7 | अर्थविज्ञानस्य (Semantics) स्वरूपं वर्णयत। |
| 1st Unit | | | 6 | 8 | प्रयोगविज्ञानस्य (Pragmatics) स्वरूपं विवृणुत। |
| 2nd Unit | | | 6 | 9 | भाषोत्पत्तिः विचार्यताम् ।। |
| 2nd Unit | | | 6 | 10 | मनोभाषाविज्ञानस्य (Psycholinguistics) स्वरूपं वर्णयत। |
| 2nd Unit | | | 6 | 11 | ऐतिहासिकभाषाविज्ञानस्य स्वरूपं विवेचयत। |
| 2nd Unit | | | 6 | 12 | तुलनात्मकभाषाविज्ञानं स्पष्टयत। |
| 2nd Unit | | | 6 | 13 | भाषायाः उत्पत्तिविषये प्रमुखसिद्धान्तान् विवेचयत। |
| 2nd Unit | | | 6 | 14 | भाषापरिवर्तनस्य कारणानि विवेचयत। |
| 2nd Unit | | | 6 | 15 | उपभाषाया स्वरूपं विवेचयत। |
| 2nd Unit | | | 6 | 16 | मानकभाषाया स्वरूपं विवेचयत। |
| 3rd Unit | | | 6 | 17 | शब्दानां नित्यत्वमनित्यत्वञ्च विचार्यताम् । |
| 3rd Unit | | | 6 | 18 | भाषासंकेतस्य (Linguistic Sign) स्वरूपं विवेचयत। |

| | | | | | |
|---|---|---|---|---|---|
| 3rd Unit | | | 6 | 19 | संरचनावादस्य (Structuralism) स्वरूपं विवेचयत। |
| 3rd Unit | | | 6 | 20 | भाषायाः वैशिष्ट्यानि विवेचयत। |
| 3rd Unit | | | 6 | 21 | भाषाधिगमस्य सिद्धान्तान् विवेचयत। |
| 3rd Unit | | | 6 | 22 | द्विभाषिकत्वस्य (Bilingualism) स्वरूपं विवेचयत। |
| 3rd Unit | | | 6 | 23 | अर्थपरिवर्तनस्य कारणानि उल्लेखं कुरुत। |
| 3rd Unit | | | 6 | 24 | भाषामानकीकरणस्य प्रक्रिया विवेचयत। |
| 4th Unit | | | 6 | 25 | ध्वन्यन्तरं (Allophone) विवेचयत। |
| 4th Unit | | | 6 | 26 | शब्दनिर्माणप्रक्रियाः विवेचयत। |
| 4th Unit | | | 6 | 27 | ध्वनिपरिवर्तनस्य प्रकारान् विवेचयत। |
| 4th Unit | | | 6 | 28 | भाषापरिवारं विवेचयत। |
| 4th Unit | | | 6 | 29 | विवेचनं कुरुत- वैदिकभाषा, पालिभाषा |
| 4th Unit | | | 6 | 30 | विवेचनं कुरुत- मूर्धन्यध्वनीनां नियमः, आर्यशाखा, |
| | | | | | LONG QUESTION |
| 1st Unit | | | 10 | 1 | भाषा का ? तस्याः स्वरूपं लक्षणानि च विवेचयत। |
| 1st Unit | | | 10 | 2 | भाषाविज्ञानस्य विभिन्नानां प्रकाराणां निरूपणं कुरुत। |
| 1st Unit | | | 10 | 3 | ध्वनिः विमृष्यताम् । |
| 1st Unit | | | 10 | 4 | भाषाविज्ञानस्याङ्गानां निरूपणं कुरुत। |
| 1st Unit | | | 10 | 5 | भाषा परिवर्तनशीला कस्माद् वर्तते? भाषापरिवर्तनस्य प्रमुखानि कारणानि कानि सन्ति? |
| 1st Unit | | | 10 | 6 | भाषोत्पत्तिविषयकाणां वादानां नामोल्लेखपूर्वकं विवेचनं कुरुत। |

| | | | | | |
|---|---|---|---|---|---|
| 2nd Unit | | | 10 | 7 | भाषायाः पारिवारिकं वर्गीकरणं निरूपयत। |
| 2nd Unit | | | 10 | 8 | भारतीयार्यभाषावर्गस्य पारिवारिकं वर्गीकरणं विवेचयत। |
| 2nd Unit | | | 10 | 9 | भारोपीयपरिवारस्य भाषावैज्ञानिकदृष्ट्या निरूपयत। |
| 2nd Unit | | | 10 | 10 | वैदिकलौकिकसंस्कृतयोः भेदान् निरूपयत। |
| 2nd Unit | | | 10 | 11 | संस्कृत-अवेस्ताभाषयोः साम्यं वैषम्यं च प्रदर्शयत। |
| 2nd Unit | | | 10 | 12 | प्राकृतभाषाणां विशेषताः निरूप्य तासां संस्कृतात् वैषम्यं च प्रदर्शयत। |
| 3rd Unit | | | 10 | 13 | स्वरूपं निरूपयत- सेमेटिकभाषापरिवारः अपभ्रंशश्च। |
| 3rd Unit | | | 10 | 14 | व्युत्पत्तेः स्वरूपं निरूप्य व्युत्पत्तेः सामान्यान् नियमान् निरूपयत। |
| 3rd Unit | | | 10 | 15 | अर्थोत्कर्षाऽर्थाप्रकर्षयोः स्वरूपं निरूपयत। |
| 3rd Unit | | | 10 | 16 | अर्थपरिवर्तनस्य बौद्धिकान् नियमान् प्रदर्शयत। |
| 3rd Unit | | | 10 | 17 | अर्थपरिवर्तनस्य कारणानां सोदाहरणमुल्लेखं कुरुत। |
| 3rd Unit | | | 10 | 18 | उच्चारणोपयोगिनां शरीरावयवानां निरूपणं कुरुत। |
| 4th Unit | | | 10 | 19 | संस्कृतवर्णमालायाः स्वरूपं निरूपयत। |
| 4th Unit | | | 10 | 20 | संस्कृतवर्णानामुच्चरणस्थानानां निरूपणं कुरुत। |
| 4th Unit | | | 10 | 21 | ध्वनिपरिवर्तनस्य प्रमुखानां कारणानां निर्देशं कुरुत। |
| 4th Unit | | | 10 | 22 | ध्वनिपरिवर्तनस्य प्रमुखानां कारणानां निर्देशं कुरुत। |
| 4th Unit | | | 10 | 23 | ध्वनिनियमस्य स्वरूपं निरूप्य तस्य वैज्ञानिकतां प्रदर्शयत। |
| 4th Unit | | | 10 | 24 | ग्रीमध्वनिनियमस्य सोपपत्तिकां व्याख्यां कृत्वा तस्य महत्त्वं निरूपयत। |
| 4th Unit | | | 10 | 25 | ग्रासमन-वेर्नरयोः ध्वनिनियमयोः स्वरूपं निरूपयत। |